नामांक Roll No.

| | | | | | | |
|---|---|---|---|---|---|---|
| | | | | | | |

Question Booklet No.

No. of Questions – 20

No. of Printed Pages – 7

**VU-86-Vyak. Shastra**

# वरिष्ठ उपाध्याय परीक्षा, 2026

# VARISHTHA UPADHYAYA EXAMINATION, 2026

## व्याकरणशास्त्रम् (ऐच्छिकम्)

**समय : 3 घण्टे 15 मिनट**

**पूर्णांक : 80**

**परीक्षार्थिभ्यः सामान्यनिर्देशाः**

1) परीक्षार्थिभिः सर्वप्रथमं स्वप्रश्नपत्रस्योपरि नामांकः अनिवार्यतो लेखनीयः ।

2) **सर्वे** प्रश्नाः अनिवार्याः ।

3) सर्वेषां प्रश्नानामुत्तराणि उत्तरपुस्तिकायामेव लेखनीयानि ।

4) एकस्य प्रश्नस्य सर्वेषां खण्डानामुत्तराणि एकत्र एव लेखनीयानि ।

5) सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतमाध्यमेन एव लेखनीयानि ।

## खण्डः – 'अ'

**1.** बहुविकल्पात्मकप्रश्नाः – **[18×1=18]**

i) 'सुद्यौः' इत्यत्र दिविति प्रातिपदिकस्य औत् भवति ______ **[1]**

अ) सहेः साडः सः    ब) दिव औत्

स) अम् सम्बुद्धौ    द) दिव उत्

ii) न ङि सम्बुद्ध्योः सूत्रमस्ति ______ **[1]**

अ) संज्ञासूत्रम्    ब) अधिकारसूत्रम्

स) अतिदेशसूत्रम्    द) विधि (निषेध) सूत्रम्

iii) दुह्-शब्दस्य षष्ठी-द्विवचने किं रूपम् ? **[1]**

अ) द्रुहोः    ब) द्रुहः

स) द्रुहाम्    द) ध्रुग्भ्याम्

iv) मघवन्-शब्दस्य चतुर्थी-एकवचने रूपमस्ति ______ **[1]**

अ) मघवानम्    ब) मघोनः

स) मघोने    द) मघोनि

v) 'अधिहरि' इत्यत्र अव्यय संज्ञा विधायकमस्ति ______ **[1]**

अ) अव्ययीभावश्च    ब) अव्ययादाप्सुपः

स) तद्धितश्चासर्वविभक्तिः    द) कृन्मेजन्तः

vi) 'शप्श्यनोर्नित्यम्' इति सूत्रस्य उदाहरणमस्ति ______ **[1]**

अ) पचति    ब) ददति

स) तुदत्    द) पचन्ती

vii) 'इमौ' इत्यत्र दस्य मकारः केन सूत्रेण भवति ? **[1]**

अ) अनाप्यकः    ब) इदोऽय् पुंसि

स) दश्च    द) इदमो मः

viii) ‘स्य:’ इत्यत्र तकारस्य सकारादेश: भवति [1]

अ) ‘‘तदो: स: सावनन्त्ययो:’’ इत्यनेन ब) ‘‘मपर्यन्तस्य’’ इत्यनेन

स) ‘‘त्वाहौ सौ’’ इत्यनेन द) ‘‘स्को: संयोगाद्योरन्तेच’’ सूत्रेण

ix) ‘मूषिका’ इत्यत्र प्रत्ययोऽस्ति _______ [1]

अ) ङीप् ब) टाप्

स) ङीष् द) ति

x) ‘बलिं याचते वसुधाम्’ इत्यत्र कर्मसंज्ञाविधायकं सूत्रमस्ति _______ [1]

अ) अकथितं च ब) कर्मणि द्वितीया

स) अनभिहिते द) अधिशीङ्स्थाऽऽसां कर्म

xi) अपादानादिविशेषैरविवक्षितं कारकं भवति _______ [1]

अ) कर्तृसंज्ञकम् ब) करणसंज्ञकम्

स) अपादानसंज्ञकम् द) कर्मसंज्ञकम्

xii) प्रथमाविधायकं सूत्रमस्ति _______ [1]

अ) कर्तुरीप्सिततमं कर्म ब) प्रातिपदिकार्थलिङ्गपरिमाणवचने प्रथमा

स) अनभिहिते द) हृक्रोरन्यतरस्याम्

xiii) ‘केशुषु चमरीं हन्ति’ इत्यत्र सप्तमीविधायकम् अस्ति _______ [1]

अ) निमित्तात् कर्मयोगे ब) सप्तम्यधिकरणे च

स) यस्य च भावेनभावलक्षणम् द) येनाङ्गविकार:

xiv) ‘दारा’ इतिशब्दस्य प्रयोग: भवति _______ [1]

अ) स्त्रीलिङ्गे ब) नपुंसकलिङ्गे

स) पुंल्लिङ्गे द) पुंनपुंसके

xv) 'लक्ष्मी:' इति शब्दस्य प्रयोग: भवति – [1]

अ) पुंल्लिङ्गे ब) स्त्रीलिङ्गे

स) नपुंसकलिङ्गे द) पुंनपुंसके

xvi) 'भू:' इति शब्दस्य प्रयोग: भवति – [1]

अ) स्त्रीलिङ्गे ब) नपुंसकलिङ्गे

स) पुंल्लिङ्गे द) पुंनपुंसके

xvii) 'क्तिन्नन्त:' इत्यस्य सूत्रस्य उदाहरणमस्ति – [1]

अ) विद्या ब) बुद्धि:

स) नाभि: द) पृथुश्री

xviii) पुंल्लिङ्गे प्रयोगो भवति – [1]

अ) याच्ञा ब) वेणि:

स) धू: द) यज्ञ:

**2.** रिक्तस्थानानि पूरयत – **[6×1=6]**

i) उगिदचां __________ अधातो: । [1]

ii) उपानह् शब्दस्य द्वितीया-एकवचने __________ रूपं भवति । [1]

iii) वार् शब्दस्य प्रथमा-एकवचने __________ रूपं भवति । [1]

iv) __________ उपधालोपिनोऽन्यतरस्याम् । [1]

v) प्रकृत्यादिगणपठितेभ्य: शब्देभ्य: __________ विभक्ति: भवति । [1]

vi) श्रोणि-योनि-उर्मि इत्येते धातुशब्दा: __________ स्त्रिलिङ्गे च प्रयुक्ता: । [1]

**3.** अतिलघूत्तरात्मकप्रश्ना: – **[12×1=12]**

i) 'प्रहण्यात्' इत्यत्र केन सूत्रेण नस्य णत्वं भवति ? [1]

ii) 'पथिन्'-शब्दे इकारस्य स्थाने अकार: केन सूत्रेण भवति ? [1]

iii) 'स्रक्षु' शब्दे चर्त्वं केन सूत्रेण भवति ? [1]

iv) इदम् शब्दस्य प्रथमा बहुवचने स्त्रीलिङ्गे रूपमस्ति । [1]

v) 'गवाक्षु' इत्यत्र जश्त्वं केन सूत्रेण भवति ? [1]

vi) 'कर्त्री' इत्यत्र ङीप्-प्रत्ययः केन सूत्रेण भवति ? [1]

vii) 'मनाक्' इति अव्ययशब्दस्य कोऽर्थः ? [1]

viii) 'रात्रौ' इत्यत्र अव्ययसंज्ञा केन सूत्रेण भवति ? [1]

ix) ''पयसा ओदनं भुङ्क्ते'' इत्यत्र कर्मसंज्ञा केन सूत्रेण भवति ? [1]

x) 'रामेण बाणेन हतो वाली' इत्यत्र करणसंज्ञा केन सूत्रेण भवति ? [1]

xi) 'सरित्' इति शब्दस्य प्रयोगः कस्मिन् लिङ्गे भवति ? [1]

xii) घञ् प्रत्ययान्ताः अप् प्रत्ययान्ताश्च शब्दाः कस्मिन् लिङ्गे प्रयुक्ताः भवन्ति ? [1]

## खण्डः – 'ब'

लघूत्तरात्मकप्रश्नाः – [10×2=20]

4. ''अम् सम्बुद्धौ'' इत्यस्य सूत्रस्य सोदाहरणमर्थो लेख्यः । [2]

5. 'राजभिः' इति रूपं साधयत । [2]

6. 'उष्णिग्' इति रूपं साधनीयम् । [2]

7. दिश् शब्दस्य तृतीया-चतुर्थी-विभक्तयोः रूपाणि लिखत । [2]

8. 'ददति' इति रूपं साधयत । [2]

9. 'शप्श्यनोर्नित्यम्' इति सूत्रस्य व्याख्या लेख्या । [2]

10. ‘क्त्वातोसुन्कसुन:’ इति सूत्रस्य सोदाहरणमर्थो लेख्य: । [2]

11. ‘उपान्वध्याङ्वस:’ इति सूत्रस्य सोदाहरणमर्थो लेख्य: । [2]

12. ‘रुच्यर्थानां प्रीयमाण:’ इति सूत्रस्य सोदाहरणमर्थो लेख्य: । [2]

13. ‘योपध:’ इति सूत्रस्य सोदाहरणमर्थो लेख्य: । [2]

**खण्ड: – ‘स’**

दीर्घोत्तरात्मकप्रश्ना:- [4×3=12]

14. अधोलिखितेषु द्वौ प्रयोगौ साधनीयौ – [1½+1½=3]

i) प्रशान् ii) वृत्रहा

iii) यून: iv) खन्

15. अधोलिखितेषु प्रयोगद्वयं साधनीयम् – [1½+1½=3]

i) अमुष्याम् ii) आशी:

iii) वाक् iv) अनया

16. अधोलिखितेषु रूप द्वयं साधनीयम् । [1½+1½=3]

i) इमे ii) कानि

iii) वाग्मीनि iv) ऊर्जी

17. अधोलिखितेषु कौचिद् द्वौ प्रयोगौ साधनीयौ – [1½+1½=3]

i) विलाता ii) कोकिला

iii) चतस्र: iv) यका

## खण्डः – 'द'

निबन्धात्मकप्रश्नाः **[3×4=12]**

**18.** अधोलिखितेषु कयोश्चिद् द्वयोः सिद्धिर्विधेया – **[2+2=4]**

i) अष्टौ ii) युङ्

iii) यूयम् iv) युष्मत्

**19.** अधोलिखितेषु प्रयोगद्वयं साधनीयम् – **[2+2=4]**

i) दण्डिनी ii) बहुराज्ञी

iii) देवका iv) अजा

**20.** अधोलिखितेषु द्वौ प्रयोगौ साधनीयौ – **[2+2=4]**

i) द्रोणो व्रीहिः ।

ii) गां दोग्धि पयः ।

iii) पादेन खञ्जः ।

iv) चोराद् बिभेति ।

DO NOT WRITE ANYTHING HERE